# Upadesha Sahasri of Shankaracharya

Chapter 18 (selected verses)
Tat-tvam-asi Prakarana

Translation by
Swami Tadatmananda
Arsha Bodha Center

चैतन्यं सर्वगं सर्वं
Consciousness – all-pervasive, all,
caitanyaṃ sarvagaṃ sarvaṃ

सर्वभूतगुहाशयम् ।
abiding in the hearts of all,
sarva-bhūta-guhāśayam

यत् सर्वविषयातीतं
beyond all objects –
yat sarva-viṣayātītaṃ

तस्मै सर्वविदे नमः ॥
unto that all-knowing one, salutations.
tasmai sarva-vide namaḥ 1.1

येनात्मना विलीयन्त
Unto atma, into which merge
yenātmanā vilīyanta

उद्भवन्ति च वृत्तयः ।
and from which arise all thoughts,
udbhavanti ca vṛttayaḥ

नित्यावगतये तस्मै
unto that unchanging consciousness
nityāvagataye tasmai

नमो धीप्रत्ययात्मने ॥
in the form of thoughts, salutations.
namo dhī-pratyayātmane 18.1

नित्यमुक्तः सदेवास्मी-
"I have always been brahman,"
nitya-muktaḥ sad evāsmī-

त्येवं चेन् न भवेन् मतिः ।
if this understanding did not arise,
tyevaṃ cen na bhaven matiḥ

किमर्थं श्रावयत्येवं
then why would scriptures
kim arthaṃ śrāvayaty evaṃ

मातृवच्छ्रुतिरादृता ॥
lovingly teach this like a mother?
mātṛvac chrutir ādṛtā 18.3

सिद्धादेवाहमित्यस्माद्
From the experienced "I"
siddhād evāham ity asmād

युष्मद्धर्मो निषिध्यते ।
"this" is negated,
yuṣmad-dharmo niṣidhyate

रज्ज्वामिवाहिधीर्युक्त्या
like snake imagined on a rope,
rajjvām ivāhidhīr yuktyā

तत् त्वमित्यादिशासनैः ॥
by teachings like tat tvam asi.
tat tvam ity ādiś-āsanaiḥ 18.4

सद् ब्रह्माहं करोमीति
"I am brahman" and "I act"
sad brahmāhaṃ karomīti

प्रत्ययावात्मसाक्षिकौ ।
are thoughts witnessed by atma.
pratyayāv ātma-sākṣikau

तयोरज्ञानजस्यैव
Of the two, the one born of ignorance
tayor ajñānajasyaiva

त्यागो युक्ततरो मतः ॥
is considered fit to be rejected.
tyāgo yuktataro mataḥ 18.6

सदस्मीति प्रमाणोत्था
"I am brahman" is understood through scripture.
sad asmīti pramāṇotthā

धीरन्या तन्निभोद्भवा ।
The other, resembling atma, arises
dhīr anyā tan-nibhodbhavā

प्रत्यक्षादिनिभा वापि
falsely through perception.
pratyakṣādi-nibhā vāpi

बाध्यते दिग्भ्रमादिवत् ॥
It is negated, like a false sense of direction.
bādhyate dig-bhramādivat 18.7

कर्ता भोक्तेति यच्छास्त्रं
When scripture refers to a doer or experiencer,
kartā bhokteti yac chāstraṃ

लोकबुद्ध्यनुवादि तत् ।
it merely restates the worldly view.
loka-buddhy-anuvādi tat

सदस्मीति श्रुतेर्जाता
From the scripture arises "I am brahman"
sad asmīti śruter jātā

बाध्यतेऽन्यैतयैव धीः ॥
which negates that worldly view.
bādhyate 'nyaitayaiva dhīḥ 18.8

सदेव त्वमसीत्युक्ते
PP: When "You are brahman" is taught,
sad eva tvam asity ukte

नात्मनो मुक्ततां स्थिराम् ।
one's liberation is not firm.
nātmano muktatāṃ sthirām

प्रपद्यते प्रसंचक्षाम्
Therefore, repetition
prapadyate prasaṃcakṣām

अतो युक्त्यानुचिन्तयेत् ॥
along with reasoning one should practice.
ato yuktyānucintayet 18.9

सकृदुक्तं न गृह्णाति
Hearing once, it is not grasped
sakṛd uktaṃ na gṛhṇāti

वाक्यार्थज्ञोऽपि यो भवेत् ।
even for one who understands the statement.
vākyārtha-jño 'pi yo bhavet

अपेक्षतेऽत एवान्यद्
Therefore, one requires something else -
apekṣate 'ta evānyad

अवोचाम द्वयं हि तत् ॥
the two things (repetition and reasoning) we said.
avochāma dvayaṃ hi tat 18.10

सदस्मीति च विज्ञानम्
The knowledge, "I am brahman"
sad asmīti ca vijñānam

अक्षजो बाधते ध्रुवम् ।
is certainly negated by perception
akṣajo bādhate dhruvam

शब्दोत्थं दृढसंस्कारो
that creates strong impressions
śabdotthaṃ dṛḍha-saṃskāro

दोषैश्चाकृष्यते बहिः ॥
which draws one outwards due to defects.
doṣaiś cākṛṣyate bahiḥ 18.13

सदसीति फलं चोक्त्वा
After teaching the goal, "You are brahman,"
sad asīti phalaṃ coktvā

विधेयं साधनं यतः ।
the scripture enjoins the necessary practice.
vidheyaṃ sādhanaṃ yataḥ

न तदन्यत् प्रसंख्यानात्
There is no other practice than repetition
na tad-anyat prasaṃkhyānāt

प्रसिद्धार्थमिहेष्यते ॥
for a goal that is already accomplished.
prasiddhārtham iheṣyate 18.17

नैतदेवं रहस्यानां
S: This is not so because the upanishads
naitad evaṃ rahasyānāṃ

नेतिनेत्यवसानतः ।
conclude, "neti neti."
neti nety avasānataḥ

क्रियासाध्यं पुरा श्राव्यं
Goals reached by action are taught earlier in the Vedas,
kriya-sādhyaṃ purā śrāvyaṃ

न मोक्षो नित्यसिद्धतः ॥
but not moksha because it is eternally established.
na mokṣo nitya-siddhataḥ 18.19

पुत्रदुःखं यथाध्यस्तं
Like the suffering of a son is superimposed
putra-duḥkhaṃ yathādhyastaṃ

पित्रादुःखे स्व आत्मनि ।
on oneself by the father who does not suffer,
pitrāduḥkhe sva ātmani

अहंकर्त्रा तथाध्यस्तं
so too, suffering is superimposed by the ego
ahaṃkartrā tathādhyastaṃ

नित्यादुःखे स्व आत्मनि ॥
on atma that is eternally free from suffering.
nityāduḥkhe sva ātmani 18.20

सोऽध्यासो नेति नेतीति
By "neti neti" that superimposition
so 'dhyāso neti netīti

प्राप्तवत् प्रतिषिध्यते ।
is negated, as if something is truly accomplished.
prāptavat pratiṣidhyate

भूयोऽध्यासविधिः कश्चित्
So, any injunctions, which are superimposed,
bhūyo 'dhyāsa-vidhiḥ kaścit

कुतश्चिन् नोपपद्यते ॥
are completely impossible.
kutaścin nopapadyate 18.21

प्राप्तश्चेत् प्रतिषिध्येत
If something acquired gets removed,
prāptaś cet pratiṣidhyeta

मोक्षोऽनित्यो भवेद् ध्रुवम् ।
then moksha is certainly temporary.
mokṣo 'nityo bhaved dhruvam

अतोऽप्राप्तनिषेधोऽयं
Therefore, moksha is negation of the non-acquired,
ato 'prāpta-niṣedho 'yaṃ

दिव्यग्निचयनादिवत् ॥
like building a fire in the sky.
divy agni-cayanādivat 18.23

अहंकर्त्रात्मनि न्यस्तं
The ego is superimposed on atma,
aham̩-kartrātmani nyastam̩

चैतन्ये कर्तृतादि यत् ।
on pure consciousness, as agency etc.
caitanye kartṛtādi yat

नेति नेतीति तत् सर्वं
By "neti neti" all that
neti netīti tat sarvam̩

साहंकर्त्रा निषिध्यते ॥
along with the ego is negated.
sāham̩kartrā niṣidhyate 18.25

संनिधौ सर्वदा तस्य
Due to the constant proximity of atma,
sam̩nidhau sarvadā tasya

स्यात् तदाभोऽभिमानकृत् ।
the ego seems like it.
syāt tadābho 'bhimānakṛt

आत्मात्मीयं द्वयं चातः
Then, I and mine arise
ātmātmīyam̩ dvayam̩ cātaḥ

स्यादहंममगोचरः ॥
as indicated by the words "aham" and "mama."
syād aham̩-mama-gocaraḥ 18.27

जातिकर्मादिमत्त्वाद् धि
Due to having caste, duties, etc,
jāti-karmādimattvād dhi

तस्मिञ् शब्दस्त्वहंकृति ।
such words apply to the ego,
tasmiñ śabdas tv aham̩kṛti

न कश्चिद् वर्तते शब्दस्
but no such words can be used
na kaścid vartate śabdas

तदभावात् स्व आत्मनि ॥
for atma due to the absence (of caste, duties, etc).
tad-abhāvāt sva ātmani 18.28

नह्यजात्यादिमान् कश्चिद्
Nothing without attributes
na hy ajātyādimān kaścid

अर्थः शब्दैर्निरूप्यते ।
can be described by words.
arthaḥ śabdair nirūpyate

आत्माभासो यतोऽहंकृद्
The ego, that resembles the Self,
ātmābhāso yato 'ham̩kṛd

आत्मशब्दैस्तथोच्यते ॥
is thus referred to as "atma."
ātma-śabdais tathocyate 18.30

मुखादन्यो मुखाभासो
A reflected face is different than a face
mukhād anyo mukhābhāso

यथादर्शानुकारतः ॥
because it depends on a mirror.
yathā darśānukārataḥ

आभासान् मुखमप्येव
A face is also different than its reflection
ābhāsān mukham apy eva

आदर्शाननुवर्तनात् ।
because it does not depend on a mirror.
ādarśānanuvartanāt 18.32

अहंकृत्यात्मनिर्भासो
Atma is reflected in the ego
ahaṃkṛty ātma-nirbhāso

मुखाभासवदिष्यते ॥
like the reflection of a face.
mukhābhāsavad iṣyate

मुखवत् स्थित आत्मान्यो
Like a face, atma is different (from its reflection)
mukhavat sthita ātmānyo

अविविक्तौ तौ तथैव च ।
even though they are actually non-different.
aviviktau tau tathaiva ca 18.33

संसारी च स इत्येक
Some say that the samsari
saṃsārī ca sa ity eka

आभासो यस्त्वहंकृति ॥
is the reflection (of consciousness) in the ego.
ābhāso yas tv ahaṃkṛti

ज्ञैकदेशो विकारो वा
Others say it is a part or modification of consciousness.
jñaikadeśo vikāro vā

तदाभासाश्रयः परे ॥
Others say it is reflected consciousness and ego.
tad-ābhāsāśrayaḥ pare 18.34

अहंकर्तैव संसारी
The ego itself is the samsari,
ahaṃkartaiva saṃsārī

स्वतन्त्र इति केचन ।
independently, others (Buddhists) say.
svatantra iti kecana

अहंकारादिसंतानः
A constant flow of transient thoughts
ahaṃkārādi-saṃtānaḥ

संसारी नान्वयी पृथक् ॥
is the samsari. Nothing permanent remains.
saṃsārī nānvayī pṛthak 18.35

तत्र न्यायो विचार्यताम्
These ideas should be examined logically.
tatra nyāyo vicāryatām

संसारिणां कथा त्वास्तां
Let us set aside these ideas about the samsari
saṃsāriṇāṃ kathā tv āstāṃ

प्रकृतं त्वधुनोच्यते ॥
and return to the topic at hand.
prakṛtaṃ tv adhunocyate 18.36

आत्माभासाश्रयाश्चैवं
Atma, its reflection, and the mind
ātmābhāsāśrayāś caivaṃ

मुखाभासाश्रया यथा ।
are represented by face, its reflection, and the mirror.
mukhābhāsāśrayā yathā

गम्यते शास्त्रयुक्तिभ्याम्
From scripture and reasoning, it is understood that
gamyate śāstra-yuktibhyām

आभासासत्त्वमेव च ॥
the reflection (of atma) is not real.
ābhāsāsattvam eva ca 18.43

मुखाभासो य आदर्शे
The reflection of a face in a mirror
mukhābhāso ya ādarśe

धर्मो नान्यतरस्य सः ।
is not a property of either (face or mirror).
dharmo nānyatarasya saḥ

द्वयोरेकस्य चेद् धर्मो
If it were a property of either,
dvayor ekasya ced dharmo

वियुक्तेऽन्यतरे भवेत् ॥
it would remain either is removed.
viyukte'nyatare bhavet 18.37

न दृशेरविकारित्वाद्
If neither unchanging consciousness,
na dṛśer avikāritvād

आभासस्याप्यवस्तुतः।
nor its unreal reflection,
ābhāsasyāpy avastutaḥ

नाचितित्वादहंकर्तुः
nor the insentient ego
nācititvād ahaṃ-kartuḥ

कस्य संसारिता भवेत् ॥
can be the samsari, then who is?
kasya saṃsāritā bhavet 18.44

अविद्यामात्र एवातः
Due to ignorance alone
avidyā-mātra evātaḥ

संसारोऽस्त्वविवेकतः ।
is samsara, due to non-discernment.
saṃsāro 'stv avivekataḥ

कूटस्थेनात्मना नित्यम्
Because of unchanging consciousness, it seems eternal,
kūṭasthenātmanā nityam

आत्मवानात्मनीव सः ॥
like the inner self.
ātmavān ātmanīva saḥ 18.45

रज्जुसर्पो यथा रज्ज्वा
Due to a rope, a rope-snake
rajju-sarpo yathā rajjvā

सात्मकः प्राग् विवेकतः ।
exists before proper discernment.
sātmakaḥ prāg vivekataḥ

अवस्तुसन्नपि ह्येष
So too, this (samsari) exists, even though unreal,
avastu sann api hy eṣa

कूटस्थेनात्मना तथा ॥
due to unchanging consciousness.
kūṭasthenātmanā tathā 18.46

संसारो वस्तुसंस्तेषां
They accept as samsara as being real,
saṃsāro vastu-saṃs teṣāṃ

कर्तृभोक्तृत्वलक्षणः ।
possessed of agency and enjoyership
kartṛ-bhoktṛtva-lakṣaṇaḥ

आत्माभासाश्रयाज्ञानात्
because of ignorance about atma, it's reflection, and ego.
ātmābhāsāśrayājñānāt

संसरन्त्यविवेकतः ॥
Due to non-discernment, they get reborn.
saṃsaranty avivekataḥ 18.49

न बुद्धेरवबोधोऽस्ति
The mind has no consciousness
na buddher avabodho 'sti

नात्मनो विद्यते क्रिया ।
and consciousness has no action.
nātmano vidyate kriyā

अतो नान्यतरस्यापि
Therefore, for neither of them
ato nānyatarasy āpi

जानातीति च युज्यते ॥
can the verb, "knows" be used.
jānātīti ca yujyate 18.54

न येषामेक एवात्मा
For those who know that atma is eternally one,
na yeṣām eka evātmā

निर्दुःखोऽविक्रियः सदा ।
free from suffering, and unchanging,
nirduḥkho 'vikriyaḥ sadā

तेषां स्याच्छब्दवाच्यत्वं
atma cannot be the direct meaning of a word
teṣāṃ syāc chabda-vācyatvaṃ

ज्ञेयत्वं चात्मनः सदा ॥
or known as an object.
jñeyatvaṃ cātmanaḥ sadā 18.57

आदर्शमुखसामान्यं
The reflection in a mirror resembles
ādarśa-mukha-sāmānyaṃ

मुखस्येष्टं हि मानवैः ।
a face, so it's accepted by people
mukhasyeṣṭaṃ hi mānavaiḥ

मुखस्य प्रतिबिम्बो हि
because the reflection of a face
mukhasya pratibimbo hi

मुखाकारेण दृश्यते ॥
is seen to be in the form of a face.
mukhākāreṇa dṛśyate 18.63

यत्र यस्यावभासस्तु
So too, because atma and its reflection
yatra yasyāvabhāsas tu

तयोरेवाविवेकतः ।
are not properly discerned,
tayor evāvivekataḥ

जानातीति क्रियां सर्वो
verbs like "knows"
jānātīti kriyāṃ sarvo

लोको वक्ति स्वभावतः ॥
are naturally used by all people.
loko vakti svabhāvataḥ 18.64

बुद्धेः कर्तृत्वमध्यस्य
When the agency of the mind is superimposed
buddheḥ kartṛtvam adhyasya

जानातीति ज्ञ उच्यते ।
on consciousness, it is said to know.
jānātīti jña ucyate

तथा चैतन्यमध्यस्य
So too, when consciousness is superimposed (on the mind)
tathā caitanyam adhyasya

ज्ञत्वं बुद्धेरिहोच्यते ॥
it is said to have consciousness.
jñatvaṃ buddher ihocyate 18.65

स्वरूपं चात्मनो ज्ञानं
Because knowledge is the nature of atma,
**svarūpaṃ cātmano jñānaṃ**

नित्यं ज्योतिः श्रुतेर्यतः ।
scripture calls it "eternal light of consciousness."
**nityaṃ jyotiḥ śruteryataḥ**

न बुद्ध्या क्रियते तस्मान्
Therefore it is not created by the mind,
**na buddhyā kriyate tasmān**

नात्मनान्येन वा सदा ॥
nor by atma, nor by anything else.
**nātmanānyena vā sadā 18.66**

बौद्धैस्तु प्रत्ययैरेवं
Because activities produced by mind
**bauddhais tu pratyayair evaṃ**

क्रियमाणैश्च चिन्निभैः ।
resemble consciousness,
**kriyamāṇaiś ca cin-nibhaiḥ**

मोहिताः क्रियते ज्ञानम्
they wrongly conclude that consciousness is created.
**mohitāḥ kriyate jñānam**

इत्याहुस्तार्किका जनाः ॥
Thus say the logicians.
**ity āhus tārkikā janāḥ 18.68**

आदर्शानुविधायित्वं
The properties of a mirror
**ādarśānuvidhāyitvaṃ**

छायाया अस्यते मुखे ।
appearing in a reflection are attributed to the face,
**chāyāyā asyate mukhe**

बुद्धिधर्मानुकारित्वं
so too, the properties of the mind
**buddhi-dharmānukāritvaṃ**

ज्ञाभासस्य तथेष्यते ॥
appearing in reflected consciousness are attributed to atma.
**jñābhāsasya tatheṣyate 18.70**

बुद्धेस्तु प्रत्ययास्तस्माद्
Therefore, the activities of the mind,
**buddhes tu pratyayās tasmād**

आत्माभासेन दीपिताः ।
being a reflection of atma, shine
**ātmābhāsena dīpitāḥ**

ग्राहका इव भासन्ते
as if they had the power of perception,
**grāhakā iva bhāsante**

दहन्तीवोल्मुकादयः ॥
like torches, etc shine.
**dahantīvolmukādayaḥ 18.71**

अदृशिर्दृशिरूपेण
Due to consciousness, the insentient
adṛśir dṛśi-rūpeṇa

भाति बुद्धिर्यदा सदा ।
mind shines. When this is understood,
bhāti buddhir yadā sadā

प्रत्यया अपि तस्याः
then the activities of the mind are understood
pratyayā api tasyāḥ

स्युस्तप्तायोविस्फुलिङ्गवत् ॥
similarly, like sparks from red-hot iron.
syus taptāyo-visphuliṅgavat 18.83

आभासस्तदभावश्च
The presence and absence of reflected consciousness -
ābhāsas tad-abhāvaś ca

दृशेः सीम्नो न चान्यथा ।
because consciousness remains -
dṛśeḥ sīmno na cānyathā

लोकस्य युक्तितः स्यातां
people experience. So logically,
lokasya yuktitaḥ syātāṃ

तद्ग्रहश्च तथा सति ॥
an observer must exists.
tad-grahaś ca tathā sati 18.84

नन्वेवं दृशिसंक्रान्तिर्
PP: If so, consciousness changes
nanv evaṃ dṛśi-saṃkrāntir

अयःपिण्डेऽग्निवद् भवेत् ।
like fire changes iron.
ayaḥ-piṇḍe 'gnivad bhavet

मुखाभासवदित्येतद्
S: By the metaphor of the reflected face
mukhābhāsavad ity etad

आदर्शे तन् निराकृतम् ॥
that change has been dismissed.
ādarśe tan nirākṛtam 18.85

कृष्णायो रोहिताभासम्
Black iron falsely appearing red
kṛṣṇāyo rohitābhāsam

इत्येतद् दृष्टमुच्यते ।
is the point of this example.
ity etad dṛṣṭam ucyate

दृष्टदार्ष्टान्ततुल्यत्वं
The similarity shown by a metaphor
dṛṣṭa-dārṣṭānta-tulyatvaṃ

न तु सर्वात्मना क्वचित् ॥
can never be perfect.
na tu sarvātmanā kvacit 18.86

तथैव चेतनाभासं
In this way, due to the reflection of consciousness
tathaiva cetanābhāsaṃ

चित्तं चैतन्यवद् भवेत् ।
the mind seems conscious,
cittaṃ caitanyavad bhavet

मुखाभासो यथादर्श
like the reflection of a face in a mirror.
mukhābhāso yathādarśa

आभासश्चोदितो मृषा ॥
The reflection has already been shown to be false.
ābhāsaś codito mṛṣā 18.87

चित्तं चेतनमित्येतच्
That the mind is conscious
cittaṃ cetanam ity etac

छास्त्रयुक्तिविवर्जितम् ।
is not supported by scripture or reasoning.
chāstra-yukti-vivarjitam

देहस्यापि प्रसङ्गः स्याच्
Otherwise, the body,
dehasy āpi prasaṅgaḥ syāc

चक्षुरादेस्तथैव च ॥
senses, etc would be conscious too.
cakṣurādes tathaiva ca 18.88

तदप्यस्त्विति चेत् तन् न
PP: Then let the body and senses also be conscious.
tad apy astv iti cet tan na

लोकायतिकसंगतेः ।
S: No. That is the position of the materialists.
lokāyatika-saṃgateḥ

न च धीर्दृशिरस्मीति
Also, no cognition "I am brahman" could arise
na ca dhīr dṛśir asmīti

यद्याभासो न चेतसि ॥
if consciousness were not reflected in the mind.
yady ābhāso na cetasi 18.89

बुद्ध्यारूढं सदा सर्वं
Everything that arises in the mind,
buddhy-ārūḍhaṃ sadā sarvaṃ

साहंकर्त्रा च साक्षिणः ।
along with ego, belongs to the witness.
sāhaṃ-kartrā ca sākṣiṇaḥ

तस्मात् सर्वावभासो ज्ञः
So, the consciousness reflected by the mind
tasmāt sarvāvabhāso jñaḥ

किंचिदप्यस्पृशन् सदा ॥
is never affected by it.
kiṃcid apy aspṛśan sadā 18.94

नाद्राक्षमहमिति अस्मिन्
**"I saw nothing in deep sleep."**
**nādrākṣam aham iti asmin**

सुषुप्तेऽन्यन् मनागपि ।
**In deep sleep, not even slightly,**
**suṣupte 'nyan manāg api**

न वारयति दृष्टिं स्वां
**can one's own consciousness be negated.**
**na vārayati dṛṣṭiṃ svāṃ**

प्रत्ययं तु निषेधति ॥
**But mental activities can be negated.a**
**pratyayaṃ tu niṣedhati 18.97**

स्वयंज्योतिर्न हि द्रष्टुर्
**"Self-shining," "Not of the seer,"**
**svayaṃ jyotir na hi draṣṭur**

इत्येवं संविदोऽस्तिताम् ।
**thus the existence of consciousness**
**ity evaṃ saṃvido 'stitām**

कौटस्थ्यं च तथा तस्याः
**is unchanging. Also,**
**kauṭasthyaṃ ca tathā tasyāḥ**

प्रत्ययस्य च लुप्तताम् ।
**mental activities are impermanent.**
**pratyayasya ca luptatām**

स्वयमेवाब्रवीच् छास्त्रं
**The scripture itself says so,**
**svayam evābravīc chāstraṃ**

प्रत्ययावगती पृथक् ॥
**distinguishing mental activities from consciousness.**
**pratyayāvagatī pṛthak 18.98**

अहंशब्दस्य या निष्ठा
**The word "I" refers to**
**ahaṃ śabdasya yā niṣṭhā**

ज्योतिषि प्रत्यगात्मनि ।
**the inner light of consciousness.**
**jyotiṣi pratyag-ātmani**

सैवोक्ता सदसीत्येवं
**That is what is meant by "tat tvam asi."**
**saivoktā sad asīty evaṃ**

फलं तत्र विमुक्तता ॥
**It's result is liberation.**
**phalaṃ tatra vimuktatā 18.101**

अशनायादिनिर्मुक्त्यै
Freeing one from suffering like hunger, etc.
aśanāyādi-nirmuktyai

तत्काला जायते प्रमा ।
knowledge arises at the time of listening.
tat-kālā jāyate pramā

तत्त्वमस्यादिवाक्यार्थे
For statements like "tat tvam asi"
tat tvam asyādi-vākyārthe

त्रिषु कालेष्वसंशयः ॥
there is no doubt in past, present, and future.
triṣu kāleṣv asaṃśayaḥ 18.103

प्रतिबन्धविहीनत्वात्
In the absence of all obstacles,
pratibandha-vihīnatvāt

स्वयं चानुभवात्मनः ।
knowledge of one's own conscious self
svayaṃ cānubhavātmanaḥ

जायेतैव प्रमा तत्र
indeed arises,
jāyetaiva pramā tatra

स्वात्मन्येव न संशयः ॥
regarding one's self, without doubt.
svātmany eva na saṃśayaḥ 18.104

कूटस्थेऽपि फलं योग्यं
Liberation can be attributed to unchanging consciousness
kūṭasthe'pi phalaṃ yogyaṃ

राजनीव जयादिकम् ।
like victory is attributed to a king,
rājanīva jayādikam

तदनात्मत्वहेतुभ्यां
because it is not the nature of atma nor an effect
tad-anātmatva-hetubhyāṃ

क्रियायाः प्रत्ययस्य च ॥
of actions and mental activities.
kriyāyāḥ pratyayasya ca 18.108

आदर्शस्तु यदाभासो
Like the reflection of a face makes the mirror
ādarśas tu yad-ābhāso

मुखाकारः स एव सः ।
appear as a face, so too,
mukhākāraḥ sa eva saḥ

यथैवं प्रत्ययादर्शो
being reflected in the mind,
yathaivaṃ pratyayādarśo

यदाभासस्तदा ह्यहम् ॥
the consciousness that appears is called "I".
yad-ābhāsas tadā hy aham 18.109

इत्येवं प्रतिपत्तिः स्यात्
In this way alone can one recognize,
ity evaṃ pratipattiḥ syāt

सदस्मीति च नान्यथा ।
"I am that," and not otherwise.
sad asmīti ca nānyathā

तत् त्वमित्युपदेशोऽपि
Otherwise, the statement, "tat tvam asi"
tat tvam ity upadeśo 'pi

द्वाराभावादनर्थकः ॥
would become meaningless in the absence of a medium (I).
dvārābhāvād anarthakaḥ 18.110

श्रोतुः स्यादुपदेशश्चेद्
If teaching is meant for the listener,
śrotuḥ syād upadeśaś ced

अर्थवत्त्वं तथा भवेत् ।
then it is useful.
arthavattvaṃ tathā bhavet

अध्यक्षस्य न चेदिष्टं
Otherwise, what listener
adhyakṣasya na ced iṣṭaṃ

श्रोतृत्वं कस्य तद् भवेत् ॥
will listen?
śrotṛtvaṃ kasya tad bhavet 18.111

आभासे परिणामश्चेन्
PP: Reflected consciousness undergoes change.
ābhāse pariṇāmaś cen

न रज्ज्वादिनिभत्ववत् ।
S: No. It is unreal like a rope, etc.
na rajjvādi-nibhatvavat

सर्पादेश्च तथावोचम्
appearing as a snake. As we have said,
sarpādeś ca tathāvocam

आदर्शे च मुखत्ववत् ॥
the face appearing in the mirror is unreal.
ādarśe ca mukhatvavat 18.114

यदाभासेन संव्याप्तः
Pervaded by reflected consciousness
yad-ābhāsena saṃvyāptaḥ

स ज्ञातेति निगद्यते ।
is the knower.
sa jñāteti nigadyate

त्रयमेतद् विविच्यात्र
Separate from these three (knower, known, instrument),
trayam etad vivicyātra

यो जानाति स आत्मवित् ॥
tthe one who knows oneself is the real knower.
yo jānāti sa ātmavit 18.120

सम्यक्संशयमिथ्योक्ताः
Correct, doubtful, and false mental activities
Samyak-saṃśaya-mithyoktāḥ

प्रत्यया व्यभिचारिणः ।
in the form of knowledge are not real.
pratyayā vyabhicāriṇaḥ

एकैवावगतिस्तेषु
One consciousness is in all three.
ekaivāvagatis teṣu

भेदस्तु प्रत्ययार्पितः ॥
Their differences are due to mental activity.
bhedas tu pratyayārpitaḥ 18.121

आधिभेदाद् यथा भेदो
Like differences due to proximity (of colored objects)
ādhibhedād yathā bhedo

मणेरवगतेस्तथा ।
appear in a crystal, so too,
maṇer avagates tathā

अशुद्धिः परिणामश्च
impurity and change (in consciousness)
aśuddhiḥ pariṇāmaś ca

सर्वं प्रत्ययसंश्रयात् ॥
are all due to mental activities.
sarvaṃ pratyaya-saṃśrayāt 18.122

प्रथनं ग्रहणं सिद्धिः
Appearance, perception and existence
prathanaṃ grahaṇaṃ siddhiḥ

प्रत्ययानामिहान्यतः ।
of mental activities are due to independent,
pratyayānām ihānyataḥ

आपरोक्ष्यात् तदेवोक्तम्
immediately present consciousness. This is
āparokṣyāt tad evoktam

अनुमानं प्रदीपवत् ॥
inferred from the lamp metaphor.
anumānaṃ pradīpavat 18.123

किमज्ञं ग्राहयेत् कश्चित्
Should one teach (atma) to an ignorant person
kim ajñaṃ grāhayet kaścit

प्रमाणेन तु केनचित् ।
with a pramana
pramāṇena tu kenacit

विनैव तु प्रमाणेन
or without a pramana,
vinaiva tu pramāṇena

निवृत्त्यान्यस्य शेषतः ॥
by negation alone, leaving it as a remainder?
nivṛttyānyasya śeṣataḥ 18.124

शब्देनैव प्रमाणेन
If words, used as a pramana,
śabdenaiva pramāṇena

निवृत्तिश्चेदिहोच्यते ।
merely negate, then
nivṛttiś ced ihocyate

अध्यक्षस्याप्रसिद्धत्वाच्
because of failing to establish consciousness,
adhyakṣasyāprasiddhatvāc

छुन्यतैव प्रसज्यते ॥
nothingness would be established.
chūnyataiva prasajyate 18.125

शब्दाद् वानुमितेर्वापि
Only through words, inference,
śabdād vānumiter vāpi

प्रमाणाद् वा ततोऽन्यतः ।
or some other pramana,
pramāṇād vā tato 'nyataḥ

सिद्धिः सर्वपदार्थानां
can the existence of everything
siddhiḥ sarva-padārthānāṃ

स्यादज्ञं प्रति नान्यथा ॥
be known, not otherwise.
syād ajñaṃ prati nānyathā 18.133

अध्यक्षस्यापि सिद्धिः
Is consciousness established
adhyakṣasyāpi siddhiḥ

स्यात् प्रमाणेन विनैव वा ।
with or without a pramana?
syāt pramāṇena vinaiva vā

विना स्वस्य प्रसिद्धिस्तु
It is established without a pramana,
vinā svasya prasiddhis tu

नाज्ञं प्रत्युपयुज्यते ॥
but that is not enough to remove ignorance.
nājñaṃ pratyupayujyate 18.134

तस्यैवाज्ञत्वमिष्टं चेज्
If atma itself had ignorance, only then
tasyaivājñatvam iṣṭaṃ cej

ज्ञातत्वेऽन्या मितिर्भवेत् ।
would a pramana would be needed for knowledge.
jñātatve 'nyā mitir bhavet

अन्यस्यैवाज्ञतायां च
If ignorance belongs to something else, then
anyasyaivājñatāyāṃ ca

तद्विज्ञाने ध्रुवा भवेत् ॥
a pramana is certainly needed for knowledge of atma.
vijñāne dhruvā bhavet 18.135

अभिन्नोऽपि हि बुद्ध्यात्मा
Even though the mind itself is partless,
abhinno 'pi hi buddhy-ātmā

विपर्यासितदर्शनैः ।
by ignorant philosophers,
viparyāsita-darśanaiḥ

ग्राह्यग्राहकसंवित्ति
into object, knower, and knowing
grāhya-grāhaka-saṃvitti

भेदवानिव लक्ष्यते ॥
it is seemingly divided.
bhedavān iva lakṣyate 18.142

भूतिर्येषां क्रिया सैव
PP: Thoughts alone are action,
bhūtir yeṣāṃ kriyā saiva

कारकं सैव चोच्यते ।
object, agent, etc.
kārakaṃ saiva cocyate

सत्त्वं नाशित्वमस्याश्चेत्
S: If you say they arise and fade,
sattvaṃ nāśitvam asyāś cet

सकर्तृत्वं तथेष्यताम् ।
there must be a knower.
sakartṛtvaṃ tatheṣyatām 18.143

नन्वस्तित्वादयो धर्मा
PP: Qualities like existence, etc.
nanv astitvādayo dharmā

नास्तित्वादिनिवृत्तयः ।
are merely the cessation of non-existence, etc.
nāstitvādi-nivṛttayaḥ

न भूतेस्तर्हि नाशित्वं
S: But thoughts cannot be negated
na bhūtes tarhi nāśitvaṃ

स्वालक्षण्यं मतम् हि ते ।
because they are known by themselves, according to you.
svālakṣaṇyaṃ matam hi te 18.144

स्वलक्षणावधिर्नाशो
Negation leads to something known by itself.
svalakṣaṇāvadhir nāśo

नाशोऽनाशनिवृत्तिता ।
If you say that destruction is the cessation of non-destruction,
nāśo 'nāśa-nivṛttitā

अगोरसत्त्वं गोत्वं ते न
then for you, a cow is the cessation of a non-cow.
agor asattvaṃ gotvaṃ te na

तु तद् गोः स्वलक्षणम् ।
But that cannot be the definition of a cow.
tu tad goḥ svalakṣaṇam 18.145

क्षणवाच्योऽपि योऽर्थः
Also, things that you call momentary
kṣaṇa-vācyo 'pi yo 'rthaḥ

स्यात् सोऽप्यन्याभाव एव ते ।
are only the cessation of the non-momentary.
syāt so 'py anyābhāva eva te 18.146

नामभेदैरनेकत्वम्
Aa
nāmabhedairanekatvam

एकस्य स्यात् कथं तव ।
Aa
ekasya syāt kathaṃ tava

अपोहो यदि भिन्नानां
Aa
apoho yadi bhinnānāṃ

वृत्तिस्तस्य कथं गवि ।
Aa
vṛttistasya kathaṃ gavi 18.147

नाभावा भेदकाः सर्वे
Aa
nābhāvā bhedakāḥ sarve

विशेषा वा कदाचन ।
Aa
viśeṣā vā kadācana

नामजात्यादयो यद्वत्
Aa
nāmajātyādayo yadvat

संविदस्तेऽविशेषतः ।
Aa
saṃvidaste'viśeṣataḥ 18.148

प्रत्यक्षमनुमानं वा
Aa
pratyakṣamanumānaṃ vā

व्यवहारे यदीच्छसि ।
Aa
vyavahāre yadīcchasi

द्रियादारकभेदैस्
Aa
driyādārakabhedais

तदभ्युपेयं ध्रुवं भवेत् ।
Aa
tadabhyupeyaṃ dhruvaṃ bhavet 18.149

तस्मान् नीलं तथा पीतं
Aa
tasmān nīlaṃ tathā pītaṃ

घटादिर्वा विशेषणम् ।
Aa
ghaṭādirvā viśeṣaṇam

संविदस्तदुपेत्यं स्याद्
Aa
saṃvidastadupetyaṃ syād

येन चाप्यनुभूयते ।
Aa
yena cāpyanubhūyate  18.150

रूपादीनां यथान्यः स्याद्
Aa
rūpādīnāṃ yathānyaḥ syād

ग्राह्यत्वाद् ग्राहकस्तथा ।
Aa
grāhyatvād grāhakastathā

प्रत्ययसय थतान्यः स्याद्
Aa
pratyayasaya thatānyaḥ syād

व्यञ्जकत्वाच् च दीपवत् ।
Aa
vyañjakatvāc ca dīpavat  18.151

अध्यक्षस्य दृशेः कीदृक्
Aa
adhyakṣasya dṛśeḥ kīdṛk

संबन्धः संभविष्यति ।
Aa
saṃbandhaḥ saṃbhaviṣyati

अध्यकृयेण तु दृश्येन
Aa
adhyakṛyeṇa tu dṛśyena

मुक्त्वान्यो द्रष्टृदृश्यताम् ।
Aa
muktvānyo draṣṭṛdṛśyatām  18.152

अध्यक्षेण कृता दृष्टिर्
Aa
adhyakṣeṇa kṛtā dṛṣṭir

दृश्यं व्याप्नोत्यतापि वा ।
Aa
dṛśyaṃ vyāpnotyatāpi vā

नित्याध्यक्षकृतः दश्चिद्
Aa
nityādhyakṣakṛtaḥ daścid

उपकारो भवेद् धियाम् ।
Aa
upakāro bhaved dhiyām  18.153

स चोक्तस्तन्निभत्वं प्राक्
Aa
sa coktastannibhatvaṃ prāk

संव्याप्तिश्च घटादिषु ।
Aa
saṃvyāptiśca ghaṭādiṣu

यथालोकादिसंव्याप्तिर्
Aa
yathālokādisaṃvyāptir

व्यञ्जकत्वाद् ध्यस्थता ।
Aa
vyañjakatvād dhyasthatā 18.154

आलोकस्थो घटो यद्वद्
Aa
ālokastho ghaṭo yadvad

बुद्ध्यारूढो भवेत् तथा ।
Aa
buddhyārūḍho bhavet tathā

धीव्याप्तिः स्याद् घटारोहो
Aa
dhīvyāptiḥ syād ghaṭāroho

धियो व्याप्तौ कर्मो भवेत् ।
Aa
dhiyo vyāptau karmo bhavet 18.155

पूर्वं स्यात् प्रत्ययव्याप्तिस्
Aa
pūrvaṃ syāt pratyayavyāptis

ततोऽनुग्रह आत्मनः ।
Aa
tato'nugraha ātmanaḥ

कृत्स्नाध्यक्षस्य सोऽयुक्तः
Aa
kṛtsnādhyakṣasya so'yuktaḥ

कालाकाशादिवत् क्रमः ।
Aa
kālākāśādivat kramaḥ 18.156

विषयग्रहणं यस्य
Aa
viṣayagrahaṇaṃ yasya

कारणापेक्षया भवेत् ।
Aa
kāraṇāpekṣayā bhavet

सत्येव ग्राह्यशेषे च
Aa
satyeva grāhyaśeṣe ca

परिणामी स चित्तवत् ।
Aa
pariṇāmī sa cittavat 18.157

अध्यक्षोऽहमिति ज्ञानं
Aa
adhyakṣo'hamiti jñānaṃ

बुद्धेरेव विनिश्चयः ।
Aa
buddhereva viniścayaḥ

नाध्यक्षस्याविशेषत्वान्
Aa
nādhyakṣasyāviśeṣatvān

न तस्यास्ति परो यतः ।
Aa
na tasyāsti paro yataḥ 18.158

कर्त्रा चेदहमित्येवम्
Aa
kartrā cedahamityevam

अनुभूयेत मुक्तता ।
Aa
anubhūyeta muktatā

सुखदुःखविनिर्मोको
Aa
sukhaduḥkhavinirmoko

नाहंकर्तरि युज्यते ।
Aa
nāhaṃkartari yujyate 18.159

देहादावभिमानोत्थो
Aa
dehādāvabhimānottho

दुःखीति प्रत्ययो ध्रुवम् ।
Aa
duḥkhīti pratyayo dhruvam

कुण्डलिप्रत्ययो यद्वत्
Aa
kuṇḍalipratyayo yadvat

प्रत्यगात्माभिमानिना ।
Aa
pratyagātmābhimāninā 18.160

बाध्यते प्रत्ययेनेह
Aa
bādhyate pratyayeneha

विवेकेनाविवेकवान् ।
Aa
vivekenāvivekavān

विपर्ययेऽसदन्तं स्यात्
Aa
viparyaye'sadantaṃ syāt

प्रमाणस्याप्रमाणतः ।
Aa
pramāṇasyāpramāṇataḥ 18.161

दाहच्छेदविनाशेषु
Aa
dāhacchedavināśeṣu

दुःखित्वं नान्यथात्मनः ।
Aa
duḥkhitvaṃ nānyathātmanaḥ

नैव ह्यन्यस दाहादाव्
Aa
naiva hyanyasa dāhādāv

अन्यो दुःखी भवेत् क्वचित् ।
Aa
anyo duḥkhī bhavet kvacit 18.162

अस्पर्शत्वाददेहत्वान्
Aa
asparśatvādadehatvān

नाहं दाह्यो यतः सदा ।
Aa
nāhaṃ dāhyo yataḥ sadā

तस्मान् मिथ्याभिमानोत्थं
Aa
tasmān mithyābhimānotthaṃ

मृते पुत्रे मृतिर्यथा ।
Aa
mṛte putre mṛtiryathā 18.163

कुण्डल्यहमिति ह्येतद्
Aa
kuṇḍalyahamiti hyetad

बाध्येतैव विवेकिना ।
Aa
bādhyetaiva vivekinā

दुःखीति प्रत्ययस्तद्वत्
Aa
duḥkhīti pratyayastadvat

केवलाहंधिया सदा ।
Aa
kevalāhaṃdhiyā sadā 18.164

सिद्धे दुःखित्व इष्टं स्यात्
Aa
siddhe duḥkhitva iṣṭaṃ syāt

तच्छकित्वं सदात्मनः ।
Aa
tacchakitvaṃ sadātmanaḥ

मिथ्याभिमानतो दुःखी
Aa
mithyābhimānato duḥkhī

तेनार्थापादनक्षयः ।
Aa
tenārthāpādanakṣayaḥ 18.165

अस्पर्शोऽपि यथा स्पर्शम्
Aa
asparśo'pi yathā sparśam

अचलश्चलनादि च ।
Aa
acalaścalanādi ca

अविवेकात् तथा दुःखं
Aa
avivekāt tathā duḥkhaṃ

मानसं चात्मनीक्षते ।
Aa
mānasaṃ cātmanīkṣate 18.166

विवेकात्मधिया दुःखं
Aa
vivekātmadhiyā duḥkhaṃ

नुद्यते चल्चादिवत् ।
Aa
nudyate calcādivat

अविवेकस्वभावेन
Aa
avivekasvabhāvena

नमो गच्छत्यनिच्छतः ।
Aa
namo gacchatyanicchataḥ 18.167

तदानुदृश्यते दुःखं
Aa
tadānudṛśyate duḥkhaṃ

नैश्चल्ये नैव तस्य तत् ।
Aa
naiścalye naiva tasya tat

प्रत्यगात्मनि तस्मात् तद्
Aa
pratyagātmani tasmāt tad

दुःखं नैवोपपद्यते ।
Aa
duḥkhaṃ naivopapadyate 18.168

त्वंसतोर्तुल्यनीडतान्
Aa
tvaṃsatortulyanīḍatān

नीलाश्ववदिदं भवेत् ।
Aa
nīlāśvavadidaṃ bhavet

निर्दुःखवाचिना योगात्
Aa
nirduḥkhavācinā yogāt

त्वंशब्दस्य तदर्थता ।
Aa
tvaṃśabdasya tadarthatā 18.169

प्रत्यगात्माभिहानेन
Aa
**pratyagātmābhihānena**

तच्छब्दस्य युतेस्तथा ।
Aa
**tacchabdasya yutestathā**

दशमस्त्वमसीत्येवं
Aa
**daśamastvamasītyevaṃ**

वाक्यं स्यात् प्रत्यफ़ात्मनि ।
Aa
**vākyaṃ syāt pratyafātmani 18.170**

स्वार्थस्य ह्यप्रहाणेन
Aa
**svārthasya hyaprahāṇena**

विशिष्टार्थसमर्पकौ ।
Aa
**viśiṣṭārthasamarpakau**

प्रत्यगात्मावगत्यन्तौ
Aa
**pratyagātmāvagatyantau**

नान्योऽर्थोऽर्थाद् विरोध्यतः ।
Aa
**nānyo'rtho'rthād virodhyataḥ 18.171**

नवबुद्ध्यपहाराद् धि
Aa
**navabuddhyapahārād dhi**

स्वात्मानं दशपूरोअम् ।
Aa
**svātmānaṃ daśapūraoam**

असश्यञ् ज्ञातुमेवेच्छेत्
Aa
**asaśyañ jñātumevecchet**

स्वमात्मानं जनस्तथा ।
Aa
**svamātmānaṃ janastathā 18.172**

अविद्याबद्धचक्षुष्ट्वात्
Aa
**avidyābaddhacakṣuṣṭvāt**

कामापहृतधीः सदा ।
Aa
**kāmāpahṛtadhīḥ sadā**

विविक्तं दृशिमात्मानं
Aa
**viviktaṃ dṛśimātmānaṃ**

नेक्षते दशमं यथा ।
Aa
**nekṣate daśamaṃ yathā 18.173**

दशमस्त्वमसीत्येवं
Aa
daśamastvamasītyevaṃ

तत्त्वमस्यादिवाक्यतः ।
Aa
tattvamasyādivākyataḥ

स्वमात्मानं विजानाति
Aa
svamātmānaṃ vijānāti

कृत्स्नान्तःकरणेक्षणम् ।
Aa
kṛtsnāntaḥkaraṇekṣaṇam 18.174

इदं पूर्वमिदं पश्चात्
Aa
idaṃ pūrvamidaṃ paścāt

पदं वाद्ये भवेदिति ।
Aa
padaṃ vādye bhavediti

नियमो नैव वेदेऽस्ति
Aa
niyamo naiva vede'sti

पदसांगत्यमर्थतः ।
Aa
padasāṃgatyamarthataḥ 18.175

वाक्ये हि श्रूयमाणानां
Aa
vākye hi śrūyamāṇānāṃ

पदानामर्थसंस्मृतिः ।
Aa
padānāmarthasaṃsmṛtiḥ

अन्वयव्यतिरेकाभ्यां
Aa
anvayavyatirekābhyāṃ

ततो वाक्यार्थबोधनम् ।
Aa
tato vākyārthabodhanam 18.176

यदा नित्येषु वाक्येषु
Aa
yadā nityeṣu vākyeṣu

पदार्थस्तु विविच्यते ।
Aa
padārthastu vivicyate

वाक्यार्थज्ञानसंक्रान्त्यै
Aa
vākyārthajñānasaṃkrāntyai

तदा प्रश्नो न युज्यते ।
Aa
tadā praśno na yujyate 18.177

अन्वयव्यतिरेकोक्तिः
Aa
anvayavyatirekoktiḥ

पदार्थस्मरणाय तु ।
Aa
padārthasmaraṇāya tu

स्मृत्यभावे न वाक्यार्थो
Aa
smṛtyabhāve na vākyārtho

ज्ञातुं शक्यो हि केनचित् ।
Aa
jñātuṃ śakyo hi kenacit 18.178

तत्त्वमस्यादिवाक्येषु
Aa
tattvamasyādivākyeṣu

त्वंपदार्थाविवेकतः ।
Aa
tvaṃpadārthāvivekataḥ

व्यज्यते नैव वाक्यार्थो
Aa
vyajyate naiva vākyārtho

नित्यमुक्तोऽहमित्यतः ।
Aa
nityamukto'hamityataḥ 18.179

अन्वयव्यतिरेकोक्तिस्तद्
Aa
anvayavyatirekoktistad

विवेकाय नान्यथा ।
Aa
vivekāya nānyathā

त्वंपदार्थविवेके हि
Aa
tvaṃpadārthaviveke hi

पाणावर्पितविल्ववत् ।
Aa
pāṇāvarpitavilvavat 18.180

वाक्यार्थो व्यज्यते चैवं
Aa
vākyārtho vyajyate caivaṃ

केवलोऽहंपदार्थतः ।
Aa
kevalo'haṃpadārthataḥ

दुःखीत्येतदपोहेन
Aa
duḥkhītyetadapohena

प्रत्यगात्मविनिश्चयात् ।
Aa
pratyagātmaviniścayāt 18.181

तत्रैवं संभवत्यर्थे
Aa
tatraivaṃ saṃbhavatyarthe

श्रुतहानाश्रुतार्थधिः ।
Aa
śrutahānāśrutārthadhiḥ

नैवं कल्पयितुं युक्ता
Aa
naivaṃ kalpayituṃ yuktā

पदवाक्यार्थकोविदैः ।
Aa
padavākyārthakovidaiḥ 18.182

प्रत्यक्षादीनि बाधेरन्
Aa
pratyakṣādīni bādheran

कृष्णलादिषु पाकवत् ।
Aa
kṛṣṇalādiṣu pākavat

अक्षजादिनिभैरेतैः
Aa
akṣajādinibhairetaiḥ

कथं स्याद् वाक्यबाधनम् ।
Aa
kathaṃ syād vākyabādhanam 18.183

दुःख्यस्मीति सति ज्ञाने
Aa
duḥkhyasmīti sati jñāne

निर्दुःखीति न जायते ।
Aa
nirduḥkhīti na jāyate

प्रत्यक्षादिनिभत्वेऽपि
Aa
pratyakṣādinibhatve'pi

वाक्यान् न व्यभिचारतः ।
Aa
vākyān na vyabhicārataḥ 18.184

स्वप्ने दुःख्यहमद्यासं
Aa
svapne duḥkhyahamadyāsaṃ

दाहच्छेदादिहेतुतः ।
Aa
dāhacchedādihetutaḥ

तत्कालभाविभिर्वाक्यैर्
Aa
tatkālabhāvibhirvākyair

ना बाधः क्रियते यदि ।
Aa
na bādhaḥ kriyate yadi 18.185

समाप्तेस्तर्हि दुःखस्य
Aa
**samāptestarhi duḥkhasya**

प्राक् च तद्बाध इष्यताम् ।
Aa
**prāk ca tadbādha iṣyatām**

न हि दुःखस्य संतानो
Aa
**na hi duḥkhasya saṃtāno**

भ्रान्तेर्वा दृश्यते क्वचित् ।
Aa
**bhrāntervā dṛśyate kvacit 18.186**

प्रत्यगात्मन आत्मत्वं
Aa
**pratyagātmana ātmatvaṃ**

दुःख्यस्मीत्यस्य बाधया ।
Aa
**duḥkhyasmītyasya bādhayā**

दशमं नवमस्येव
Aa
**daśamaṃ navamasyeva**

वेद चेदविरुद्धता ।
Aa
**veda cedaviruddhatā 18.187**

नित्यमुक्तत्वविज्ञानं
Aa
**nityamuktatvavijñānaṃ**

वाक्याद् भवति नान्यतः ।
Aa
**vākyād bhavati nānyataḥ**

वाक्यार्थस्यापि विज्ञानं
Aa
**vākyārthasyāpi vijñānaṃ**

पदार्थस्मृतिपूर्वकम् ।
Aa
**padārthasmṛtipūrvakam 18.188**

अन्वयव्यतिरेकाभ्यां
Aa
**anvayavyatirekābhyāṃ**

पदार्थः स्मर्यते ध्रुवम् ।
Aa
**padārthaḥ smaryate dhruvam**

एवं निर्दुःखमात्मानम्
Aa
**evaṃ nirduḥkhamātmānam**

अक्रियं प्रतिपद्यते ।
Aa
**akriyaṃ pratipadyate 18.189**

सदेवेत्यादिवाक्येभ्यः
Aa
sadevetyādivākyebhyaḥ

प्रमा स्फुटतरा भवेत् ।
Aa
pramā sphuṭatarā bhavet

दशमस्त्वमसीत्यस्माद्
Aa
daśamastvamasītyasmād

यथैवं प्रत्यगात्मनि ।
Aa
yathaivaṃ pratyagātmani 18.190

प्रबोधेन यथा स्वाप्नं
Aa
prabodhena yathā svāpnaṃ

सर्वं दुःखं निवर्तते ।
Aa
sarvaṃ duḥkhaṃ nivartate

प्रत्यगात्मधिया तद्वद्
Aa
pratyagātmadhiyā tadvad

दुःखित्वं सर्वदात्मनः ।
Aa
duḥkhitvaṃ sarvadātmanaḥ 18.191

कृष्णलादौ प्रमाजन्म
Aa
kṛṣṇalādau pramājanma

तदन्यार्थामृदुत्वतः ।
Aa
tadanyārthāmṛdutvataḥ

तत्त्वमस्यादिवाक्येषु
Aa
tattvamasyādivākyeṣu

न त्वेवमविरोधतः ।
Aa
na tvevamavirodhataḥ 18.192

वाक्ये तत् त्वमसीत्यस्मिञ्
Aa
vākye tat tvamasītyasmiñ

ज्ञातार्थं तदसिद्वयम् ।
Aa
jñātārthaṃ tadasidvayam

त्वमर्थस्मृत्यसाहाय्याद्
Aa
tvamarthasmṛtyasāhāyyād

वाक्यं नोत्पादयेत् प्रमाम् ।
Aa
vākyaṃ notpādayet pramām 18.193

तत्त्वमोस्तुल्यनीडार्थम्
Aa
tattvamostulyanīḍārtham

सीत्येतत् पदं भवेत् ।
Aa
asītyetat padaṃ bhavet

तच्छब्दः प्रत्यगात्मार्थस्
Aa
tacchabdaḥ pratyagātmārthas

तच्छब्दार्थस्त्वमस्तथा ।
Aa
tacchabdārthastvamastathā 18.194

दुःखित्वाप्रत्यगात्मत्वं
Aa
duḥkhitvāpratyagātmatvaṃ

वारयेतामुभावपि ।
Aa
vārayetāmubhāvapi

एवं च नेतिनेत्यर्थं
Aa
evaṃ ca netinetyarthaṃ

गमयेतां परस्परम् ।
Aa
gamayetāṃ parasparam 18.195

एवं तत् त्वमसीत्यस्य
Aa
evaṃ tat tvamasītyasya

गम्यमाने फले कथम् ।
Aa
gamyamāne phale katham

अप्रमाणत्वमस्योद्वा
Aa
apramāṇatvamasyodtvā

क्रियापेक्ष्त्वमुच्यते ।
Aa
kriyāpekṣtvamucyate 18.196

तस्मादाद्यन्तमध्येषु
Aa
tasmādādyantamadhyeṣu

कुर्वित्येतद् विरोध्यतः ।
Aa
kurvityetad virodhyataḥ

न कल्प्यमश्रुतत्वाच्
Aa
na kalpyamaśrutatvāc

च श्रुतत्यागोऽप्यनर्थकः ।
Aa
ca śrutatyāgo'pyanarthakaḥ 18.197

यथानुभूयते तृप्तिर्
Aa
yathānubhūyate tṛptir

भुजेर्वाक्यान् न गम्यते ।
Aa
bhujervākyān na gamyate

वाद्यस्य विधृतिस्तद्वद्
Aa
vādyasya vidhṛtistadvad

गोशकृत्पायसिक्रिय ।
Aa
gośakṛtpāyasikriya 18.198

सत्यमेवमनात्मार्थे
Aa
satyamevamanātmārthe

वाक्यात् पारोक्षबोधनम् ।
Aa
vākyāt pārokṣabodhanam

प्रत्यगात्मनि न त्वेवं
Aa
pratyagātmani na tvevaṃ

संह्याप्राप्तिवदध्रुवम् ।
Aa
saṃhyāprāptivadadhruvam 18.199

स्वसंवेद्यत्वपर्यायः
Aa
svasaṃvedyatvaparyāyaḥ

स्वप्रमाणक इष्यताम् ।
Aa
svapramāṇaka iṣyatām

निवृत्तावह्मः सिद्धः
Aa
nivṛttāvahmaḥ siddhaḥ

स्वात्मनोऽनुभवश्च नः ।
Aa
svātmano'nubhavaśca naḥ 18.200